ॐ हिर॑ण्यवर्णा॒ं हरि॑णीं सुव॒र्णर॑जत॒स्र॑जाम् ।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥१॥

oṁ hiraṇyavarṇāṁ hariṇīṁ suvarṇa rajata-srajām |

candrāṁ hiraṇ-mayīṁ lakṣmīṁ jātavedo ma āvaha || 1 ||

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॓म् ।

यस्या॒ं हिर॑ण्यं वि॒न्देय॒ं गामश्व॒ं पुरु॑षान॒हम् ॥२॥

tāṁ ma āvaha jāta-vedo lakṣmīm anapagāminīm |

yasyāṁ hiraṇyaṁ vindeyaṁ gāmaśvaṁ puruṣān aham || 2 ||

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॓द-प्र॒बोधि॑नीम् ।

श्रियं॓ दे॒वीमुप॑ह्वये॒ श्रीर्मा॓ दे॒वीर्जु॑षताम् ॥३॥

aśva-pūrvāṁ ratha-madhyāṁ hasti-nāda prabodhinīm |

śrīyaṁ devīm upahvaye śrīr-mā devī juṣatām || 3 ||

कां॒ सो॒स्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम् ।

प॒द्मे स्थि॒तां प॒द्मव॑र्णां ताम॒िहोप॑ह्वये॒ श्रियम् ॥४॥

kāṁ sosmitāṁ hiraṇya prākārām ārdrāṁ jvalantīṁ tṛptāṁ tarpayantīm |

padme sthitāṁ padma-varṇāṁ tām ihopahvaye śrīyam || 4 ||

च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के दे॒वजु॑ष्टामुदा॒राम् ।

तां प॒द्मिनी॑मीं॒ श॒र॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृ॑णे ॥५॥

c̱andrāṁ prabhā̱sāṁ ya̱śasā̱ jvalantī̱ṁ śriyaṁ lo̱ke de̱va juṣṭām udā̱rām |
tāṁ pa̱dminīmī̱ṁ śaraṇam a̱haṁ prapadye'lakṣmīr me naśyatā̱ṁ tvāṁ vṛṇe || 5 ||

आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः ।

तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः ॥६॥

ā̱di̱tya varṇe̱ tapa̱so'dhijā̱to vana̱spati̱s tava vṛ̱kṣo'tha bi̱lvaḥ |
tasya̱ phalāni̱ tapa̱sā nudantu mā̱yāntarā̱ yāśca bā̱hyā ala̱kṣmīḥ || 6 ||

उपै॑तु॒ मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।

प्रा॒दु॒र्भू॒तोऽस्मि॑ रा॒ष्ट्रेऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥७॥

upaitu̱ māṁ deva-sa̱khaḥ kī̱rtiśca̱ maṇinā sa̱ha |
prā̱du̱rbhū̱to’smi rāṣṭre̱'smin kī̱rtim ṛ̱ddhiṁ da̱dātu me || 7 ||

क्षु॒त्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॑ल॒क्ष्मीं ना॑शया॒म्यहम् ।

अभू॑ति॒मस॑मृद्धिं॒ च सर्वां॒ निर्णु॑द मे॒ गृहा॑त् ॥८॥

kṣut-pipā̱sāṁ malāṁ jye̱ṣṭhām ala̱kṣmīṁ nāśayā̱myaham |
abhūti̱m asamṛddhi̱ṁ ca sarvā̱n nirṇuda me̱ gṛhāt || 8 ||

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

gandha-dvārāṁ durādharṣāṁ nitya puṣṭāṁ karīṣiṇīm |
īśvarīguṁ sarva bhūtānāṁ tām ihopahvaye śriyam || 9 ||

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

manasaḥ kāmam ākūtiṁ vācas satyam aśīmahi |
paśūnāguṁ rūpam-annasya mayi śrīś śrayatāṁ yaśaḥ || 10 ||

कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

kardamena prajā-bhūtā mayi saṁbhava kardama |
śriyaṁ vāsaya me kule mātaraṁ padma mālinīm || 11 ||

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥

āpas sṛjantu snigdhāni ciklīta vasa me gṛhe |
nica devīṁ mātaraggaś śriyaṁ vāsaya me kule || 12 ||

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥

ārdrāṁ puṣkariṇīṁ puṣṭiṁ suvarṇāṁ hema mālinīm |
sūryāṁ hiraṇmayīṁ lakṣmīṁ jātavedo ma āvaha || 13 ||

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥

ārdrāṁ yaḥ kariṇīṁ yaṣṭiṁ piṅgalāṁ padma mālinīm |
candrāṁ hiraṇmayīṁ lakṣmīṁ jātavedo ma āvaha || 14 ||

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्, विन्देयं पुरुषानहम् ॥१५॥

tāṁ ma āvaha jātavedo lakṣmīm anapagāminīm |
yasyāṁ hiraṇyaṁ prabhūtaṁ gāvo dāsyo'śvān vindeyaṁ puruṣān aham || 15 ||

य: शुचि: प्रयतोभूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकाम: सततं जपेत् ॥१६॥

yaś śuciḥ prayato bhūtvā juhuyād ājyam anvaham |
sūktaṁ pañca daśarcaṁ ca śrī kāma satataṁ japet || 16 ||

पद्मानने पद्मउरू पद्माक्षि पद्मसंभवे।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्॥१७॥

padma-priye padmini padma-haste padmālaye padma-dalāyatākṣi |
viśva-priye viṣṇu mano'nukūle tvat pāda padmam mayi sannidhatsva || 17 ||